श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीदशावतारस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीदशावतारस्तोत्रम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

देवो नः शुभमातनोतु दशधा निर्वर्तयन् भूमिकां
रङ्गे धामनि लब्धनिर्भररसैरध्यक्षितो भावुकैः।
यद्भावेषु पृथग्विधेष्वनुगुणान् भावान् स्वयं बिभ्रती
यद्धर्मैरिह धर्मिणी विहरते नानाकृतिर्नायिका॥ १ ॥

निर्मग्नश्रुतिजालमार्गणदशादत्तक्षणैर्वीक्षणैः
अन्तस्तन्वदिवारविन्दगहनान्यौदन्वतीनामपाम्।
निष्प्रत्यूहतरङ्गरिङ्गणमिथःप्रत्यूढपाथश्छटा-
डोलारोहसदोहळं भगवतो मात्स्यं वपुः पातु नः॥ २ ॥

अव्यासुर्भुवनत्रयीमनिभृतं कण्डूयनैरद्रिणा
निद्राणस्य परस्य कूर्मवपुषो निःश्वासवातोर्मयः।
यद्विक्षेपणसंस्कृतोदधिपयःप्रेङ्खोळपर्यङ्किका-
नित्यारोहणनिर्वृतो विहरते देवः सहैव श्रिया॥ ३ ॥

गोपायेदनिशं जगन्ति कुहनापोत्री पवित्रीकृत-
ब्रह्माण्डः प्रळयोर्मिघोषगुरुभिर्घोणारवैर्घुर्घुरैः।
यद्दंष्ट्राङ्कुरकोटिगाढघटनानिष्कम्पनित्यस्थितिः
ब्रह्मस्तम्बमसौदसौ भगवती मुस्तेव विश्वम्भरा॥ ४ ॥

प्रत्यादिष्टपुरातनप्रहरणग्रामः क्षणं पाणिजैः
अव्यात् त्रीणि जगन्त्यकुण्ठमहिमा वैकुण्ठकण्ठीरवः।
यत्प्रादुर्भवनादवन्ध्यजठरा यादृच्छिकाद्वेधसां
या काचित् सहसा महासुरगृहस्थूणा पितामह्यभूत्॥ ५ ॥

www.prapatti.com

व्रीडाविद्धवदान्यदानवयशोनासीरधाटीभटः
त्रैयक्षं मकुटं पुनन्नवतु नस्त्रैविक्रमो विक्रमः।
यत्प्रस्तावसमुच्छ्रितध्वजपटीवृत्तान्तसिद्धान्तिभिः
स्रोतोभिः सुरसिन्धुरष्टसु दिशासौधेषु दोधूयते॥ ६ ॥

क्रोधाग्निं जमदग्निपीडनभवं सन्तर्पयिष्यन् क्रमात्
अक्षत्रामिह सन्ततक्ष य इमां त्रिःसप्तकृत्वः क्षितिम्।
दत्त्वा कर्मणि दक्षिणां क्वचन तामास्कन्द्य सिन्धुं वसन्
अब्रह्मण्यमपाकरोतु भगवानाब्रह्मकीटं मुनिः॥ ७ ॥

पारावारपयोविशोषणकलापारीणकालानल-
ज्वालाजालविहारहारिविशिखव्यापारघोरक्रमः।
सर्वावस्थसकृत्प्रपन्नजनतासंरक्षणैकव्रती
धर्मो विग्रहवानधर्मविरतिं धन्वी स तन्वीत नः॥ ८ ॥

फक्कत्कौरवपट्टणप्रभृतयः प्रास्तप्रलम्बादयः
तालाङ्कस्य तथाविधा विहृतयस्तन्वन्तु भद्राणि नः।
क्षीरं शर्करयेव याभिरपृथग्भूताः प्रभूतैर्गुणैः
आकौमारकमस्वदन्त जगते कृष्णस्य ताः केलयः॥ ९ ॥

नाथायैव नमःपदं भवतु नश्चित्रैश्चरित्रक्रमैः
भूयोभिर्भुवनान्यमूनि कुहनागोपाय गोपायते।
कालिन्दीरसिकाय कालियफणिस्फारस्फटावाटिका-
रङ्गोत्सङ्गविशङ्कचङ्क्रमधुरापर्यायचर्या यते॥ १० ॥

भाविन्या दशया भवन्निह भवध्वंसाय नः कल्पतां
कल्की विष्णुयशस्सुतः कलिकथाकालुष्यकूलङ्कषः।
निःशेषक्षतकण्टके क्षितितले धाराजलौघैर्ध्रुवं
धर्मं कार्तयुगं प्ररोहयति यन्निस्त्रिंशधाराधरः॥ ११ ॥

इच्छामीन विहारकच्छप महापोत्रिन् यदृच्छाहरे
रक्षावामन रोषराम करुणाकाकुत्स्थ हेलाहलिन्।



www.prapatti.com

क्रीडावल्लव कल्कवाहनदशाकल्किन्निति प्रत्यहं
    जल्पन्तः पुरुषाः पुनन्ति भुवनं पुण्यौघपण्यापणाः॥ १२॥

विद्योदन्वति वेङ्कटेश्वरकवौ जातं जगन्मङ्गळं
    देवेशस्य दशावतारविषयं स्तोत्रं विवक्षेत यः।
वक्त्रे तस्य सरस्वती बहुमुखी भक्तिः परा मानसे
    शुद्धिः काऽपि तनौ दिशासु दशसु ख्यातिः शुभा जृम्भते॥ १३॥

॥ इति श्रीदशावतारस्तोत्रं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

www.prapatti.com